कषष्टिकाद्यत्॥ विभाषातिलमाषोमाभंगाणुभ्यः॥ सर्वचर्मणःकृतःखखञौ॥ यथामु
खसंमुखस्यदर्शनःखः॥ तस्यवीदंपथ्यंगकर्मपत्रपात्रंव्याप्नोति॥ आप्नपदंप्राप्नोति॥
अनुपदसर्वान्नायानयंबद्धाभक्षयतिनेयेषु॥ परोवरपरंपरपुत्रपौत्रमनुभवति॥ अ
वारपारात्यंतानुकामंगामी॥ समांसमांविजायते॥ अद्यश्वीनावसथ्ये॥ आगवीनः॥ अ
नुग्वलंगामी॥ अध्वनोयत्खौ॥ अध्यमित्राच्छ्च॥ गोणात्खञ्भतपूर्वे॥ अश्वस्येकाहग
मः॥ शालीनकौपीनेअधृष्टाकार्ययोः॥ १॥ व्रातेनजीवति॥ खास्तपदीनंसखञ्॥ हयंगवीनं
संज्ञायां॥ तस्यपाकमूलेपील्वादिकर्णादिभ्यःकुणब्जाहचौ॥ पक्षात्तिः॥ तेनवित्तश्चुचुप्
चपापौ॥ विनञ्भ्यांनानाञौनसह॥ वेःशालच्छंकटचौ॥ संज्ञोदश्वकटच्॥ अवाक्कुटार

च॥ नतेनाग्निकायाः संज्ञायांटीटञ्नाटच्भटच्॥ नेर्बिडज्बिरीसचौ॥ इनच्यिटच्चि
कचि॥ उपाधिभ्यांत्यकंनासंनाकूटयोः॥ कर्मविघटोठच्॥ तदस्यसंजातंतारकादि
भ्यइतच्॥ प्रमाणेद्वयसज्दघ्नञ्मात्रचः॥ पुरुषहस्तिभ्यामण्च॥ यत्तदेतेभ्यःपरिमाणो
वतुप्॥ किमिदंभ्यांवोघः॥ २॥ किमःसंख्यापरिमाणेडतिच॥ संख्याया अवयवेतयप्॥
द्वित्रिभ्यांतयस्यायज्वा॥ उभादुदात्तोनित्यं॥ तदस्मिन्नधिकमितिदशांताड्डः॥ शदंतवि
शतेश्च॥ संख्यायागुणस्यनिमानेमयट्॥ तस्यपूरणेडट्॥ नांतादसंख्यादेर्मट्॥
षट्चछंदसि॥ षट्कतिकतिपयचतुरांथुक्॥ बहुपूगगणसंघस्यतिथुक्॥ वतोरि
थुक्॥ द्वेस्तीयः॥ त्रेःसंप्रसारणंच॥ विंशत्यादिभ्यस्तमडन्यतरस्यां॥ नित्यंशतादि
मासार्धमाससंवत्सराच्च॥ षष्ट्यादेश्चासंख्यादेः॥ मतौ छःसूक्तसाम्नोः॥ अध्या

यानुवाकयोर्लुक्॥३॥विमुक्तादिभ्योण्॥गोषदादिभ्योवुन्॥तत्रकुशलः पथः॥आकर्षादि
भ्यःकन्॥धनहिरण्यात्कामे॥स्वांगेभ्यःप्रसिते॥उद्यताहुंगाघुने॥सस्येनपरिजातः॥अं
शंहारी॥तंत्रादचिरापहृते॥ब्राह्मणकौषिकेसंज्ञायां॥रीतोछाभ्यांकारिणि॥अधिकं॥
अनुकामिकाभीकःकमिता॥पार्श्वेनान्विच्छति॥अयःशूलदंडाजिनाभ्यांठक्ठञौ॥लाव
तिथंग्रहपामितिलुग्वा॥सप्तपंग्रामपशोः॥श्वेतवत्सरूपबंधनंकरभे॥उत्कउन्मनाः॥४॥
कालप्रयोजनाद्रोगे॥तदस्मिन्नन्नंप्रायेसंज्ञायां॥कुल्माषाद्ञ्॥श्रोत्रियंश्छंदोधीते॥
श्राद्धमनेनभुक्तमिनिठनौ॥पूर्वादिनिः॥सपूर्वाच्च॥दक्षादिभ्यश्च॥छंदसिपरिपथि
परिपरिणोपर्यवस्थातरि॥अनुपद्यन्वेष्टा॥साक्षाद्द्रष्टरिसंज्ञायां॥क्षेत्रियच्परक्षे ॥३५॥
त्रेचिकित्स्यः॥हृदयमिद्धलिंगमिद्दृष्टमिद्दरद्दृमिद्जुष्टमिद्दत्तमितिवा॥तदस्यास्ति

अस्मिन्निति मतुप्॥रसादिभ्यश्च॥प्राणिस्थादातोलजन्यतरस्यां॥सिध्मादिभ्यश्च॥वत्सोसाभ्यां
कामबले॥फेनादिलच्च॥लोमादिपामादिपिच्छादिभ्यःशनेलचः॥५॥प्रज्ञाश्रद्धार्चाहनिभ्यो
णः॥तपःसहस्राभ्यांविनीनी॥अपच्च॥सिकताशर्कराभ्यांच॥दर्शोलुबिलचौच॥दंतउन्न
तउरच्च॥उपशुनिमुष्कमधोरः॥घुडुभ्यांमः॥केशाद्वोन्यतरस्यां॥गोप्यजागासंज्ञायां॥
कांडांडादीरन्नीरचौ॥रज्जुःरूप्यासुतिपरिषदोबलच्च॥दंतशिरावासंज्ञायां॥जोस्नातमि
स्राश्वगिपोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः॥अतइनिठनौ॥व्रीह्यादिभ्यश्च॥
तुंदादिभ्यइलच्च॥एकगोपूर्वाद्ठञनित्यं॥शतसहस्रांताच्चनिष्कात्॥रूपादाहतप्रशंस
योर्यप्॥६॥अस्मायामेधास्रजोविनिः॥बहुलंछंदसि॥ऊर्णायायुस्॥वाचोग्मिनिः॥
आलजाटचौबहुभाषिणि॥स्वामिन्नैश्वर्ये॥अर्शआदिभ्योच्॥दृढोपतापगर्ह्यात्रा

णिस्थादिनिः॥ वानाती सारा भ्यां कुकुच॥ वयसिपूरणात्॥ सुरथादिभ्यश्च॥ धर्मशीलव
॥३६॥ र्णीताच॥ हस्ताज्जाती॥ वर्णा द्वुलच्चारणि॥ पुष्करादिभ्योदेशे॥ बलादिभ्यो मतुबन्यतर
स्यां॥ संज्ञायांमन्माभ्यां॥ कंशंभ्यां बभयुस्तितुतयसः॥ तुंदिबलिवटेर्भः॥ अहंशुभमो
र्युस्॥ ७॥ धान्यानांभवनेक्षेत्रेखञ्॥ विमुक्तादिभ्यः कालप्रज्ञास्थायामेधाविंशतिः॥ इति
हृतीयः पादः॥ प्राग्दिशोविभक्तिः॥ किंसर्वनामबहुभ्योद्यादिभ्यः॥ इदमश्॥ एतेतो र
थोः॥ एतदोश्॥ सर्वस्यसोन्यतरस्यांदि॥ पंचम्यास्तसिल्॥ तृसेभ्र॥ पर्यभिभ्याच॥
सप्तम्यास्त्रल्॥ इदमोहः॥ किमोत्॥ वाहचछंदसि॥ इतराभ्योपिदृश्यंते॥ सर्वैकान्य
किंयत्तदःकालेदा॥ इदमोर्हिल्॥ अधुना॥ दानीं च॥ तदोदाच॥ तयोर्दार्हिलौ च छंदसि ॥३६॥
॥ ९॥ अनद्यतनेर्हिलन्यतरस्यां॥ सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्येद्युर

न्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः॥ प्रकारवचनेथाल्॥ इदमस्थ
मुः॥ किमश्च॥ थाहेतौच छंदसि॥ दिक्शब्देभ्यः सप्तमीपंचमीप्रथमाभ्योदिग्देशाका
लेष्वस्तातिः॥ दक्षिणोत्तराभ्यामतसुच्॥ विभाषापरावराभ्यां॥ अंचेर्लुक्॥ उपर्युपरि
ष्टात्॥ पश्चात्॥ पश्चपश्चाच छंदसि॥ उत्तराधरदक्षिणादातिः॥ एनबन्यतरस्यामा
दूरेपंचम्याः॥ दक्षिणादाच्॥ आहिचदूरे॥ उत्तराच्च॥ पूर्वाधरावराणामसिपुरधव
श्चैषां॥ अस्तातिच॥ २॥ विभाषावरस्य॥ संख्यायाविधार्थेधा॥ अधिकरणविचाले
च॥ एकाद्धोध्यमुअन्यतरस्यां॥ द्वित्रिभ्यांधमुञ्॥ एधाच्च॥ याप्ये पाशप्॥ पूरणा
द्गुणेसंख्यायासदृ॥ प्रागेकादशभ्यश्छंदसि॥ षष्ठ्याक्रोशेच॥ मानपश्वंगयोः
कनलुकौच॥ एकादाकिनिच्चासहाये॥ भूतपूर्वेचरट्॥ षष्ठ्यारूप्यच॥ अतिशायने

तमविच्छतौ॥तिङश्च॥ द्विवचनविभक्तीपपदेतरबीयसुनौ॥ अजादीगुणवचनादेव॥
॥३७॥ तुच्छंदसि॥प्रत्ययस्थश्च॥३॥ज्यच॥ दृदृयच॥अंतिकबाढयोर्नेदसाधौ॥युवाल्प
योःकनन्यतरस्यां॥विन्मतोर्लुक्॥प्रशंसायांरूपप्॥ईषदसमाप्तौकल्पब्देश्यदेशीयरः॥
विभाषासुपोबहुपुरस्तात्॥प्रकारवचनेजातीयर्॥प्राग्दिशांक्॥अव्ययसर्वनाम्ना
मकच्प्राक्टेः॥कस्यचदः॥अस्तेः॥कुत्सितेः॥संज्ञायांकन्॥अनुकंपायां॥नीतौचतद्यु
क्तात्॥बहुचोमनुष्यनाम्नष्ठञ्॥घनिलचौच॥प्राचामुपादेरडज्बुचौच॥४॥जातिना
म्नःकन्॥अजिनान्तस्योत्तरपदलोपश्च॥ठाजादावूर्ध्वंद्वितीयादचः॥शेवलसुपरिवि
शालवरूणार्यमादीनांतृतीयात्॥अत्ये॥इकेः॥संज्ञायांकन्॥कुटीशमीशुंडाभ्योरः॥ ॥३७॥
कुल्माडुपच्॥कासूगोणीभ्याष्टरच्॥वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वे॥किंयत्तदोनिर्धा

रणेद्वयोरेकस्यडतरच्॥बहूनांजातिपरिप्रश्नेडतमच्॥एकाच्प्राचां॥अवक्षे
पणेकन्॥इवेप्रतिकृतौ॥संज्ञायांच॥तुंमनुष्ये॥जीविकार्थेचापण्ये॥देवपथादिभ्य
श्च॥५॥वस्तेर्ढञ्॥शिलायाढः॥शाखादिभ्योयः॥द्व्यचश्छन्दसि॥कुशाग्राच्छः॥समा
साच्चतद्धियात्॥शर्करादिभ्योण्॥अंगुल्यादिभ्यष्ठक्॥एकशालायाष्ठजन्यतरस्यां॥
कर्कलोहितादीकक्॥प्रत्नपूर्वविश्वेमात्थालछंदसि॥पूगाञ्योग्रामणीपूर्वात्॥ब्रात
फञोरस्त्रियां॥आयुधजीविसंघाञ्यड्ढकञां॥पाराशर्यशिलालिभ्यांभिक्षुसूत्रयोः॥
दामन्यादित्रिगर्तषष्ठाच्छः॥पर्श्वादियौधेयादिभ्यामणञौ॥अभिजिद्वि
दभृच्छालावधिखावछमीनदर्णावणुमत्स्योयञ्॥व्याघ्रयक्षद्राजाः॥६॥प्रा
ग्दिशोनघसनेर्विभाषाऽन्यत्रजातिनाम्नोवस्तेरेकोनविंशतिः॥तृतीयःपादः॥

पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च॥ दंड्यवसर्गयोश्च॥ स्थूलादिभ्यः प्रकारवचनेकन्॥ अनत्यंतगतौक्तात्॥ नसामिवचने॥ दृहस्याच्छादने॥ अयउक्षासितंश्वलकर्मालपुरुषाध्युनरपदात्वः॥ विभाषांचेरदिक्स्त्रियां॥ जात्यंताच्छबंधुनि॥ स्थानांतागारादिनामसंस्थानेनैति चेत्॥ किमेतिङव्ययघादाम्बद्रव्यप्रकर्षे॥ अमुच्छंदसि॥ अनुगादिनष्ठक्॥ णाचस्त्रियामञ्॥ अणिनुणः॥ विसारिणोमत्स्ये॥ संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुच्॥ द्वित्रिचतुर्भ्यःसुच्॥ एकस्यसकृच्च॥ विभाषाबहोर्धाविप्रकृष्टकाले॥ तत्रकृतंचयनेमयट्॥ समूहवच्चबहुषु॥ अनंतावसथेतिहभेषजाज्यः॥ देवतांतात्तादर्थ्येयत्॥ पोदाघोभ्यांच॥ ॥३८॥

अतिथेर्ण्यः॥ देवात्तल्॥ अवेःकः॥ यावादिभ्यःकन्॥ लोहितान्मणौ॥ वर्णेचानित्ये॥ रक्ते॥ कालाच्च॥ विनयादिभ्यष्ठक्॥ वाचोव्याहृतोर्थायां॥ तघुक्तकर्मणोण्॥ ओषधेरजातौ॥ प्रतादिभ्यश्च॥ मदस्तिकन्॥ सक्तौप्रशंसायां॥ २॥ एकस्मेष्टाप्योतितूतातिलोचछंदसि॥ बहुल्पेष्टकारकात्प्रयतरस्यां॥ संख्यैकवचनाच्चीप्सायां॥ प्रतियोगेपंचम्यास्तसिः॥ अपादाने चाहीयरुहोः॥ अतियहाव्यथनक्षेपेष्वकर्तरितृतीयायाः॥ हीयमानपापयोगाच्च॥ षष्ठ्याव्याश्रये॥ रोगाच्चापनयने॥ अमूतप्रादेरकर्तरियोगेसंपदकर्तरिचेः॥ अकर्मकाच्चेतोरहोरजसोर्लोपश्च॥ विभाषासातिकार्त्स्न्ये॥ अभिविधौसंपदा च॥ तदधीनवचने॥ देयेत्रा च॥ देवमनुष्य

पुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्बहुलं॥अव्ययानुकरणाच्चजवरार्धादितोऽनुः॥
रूओद्वितीयतृतीयशंबबीजात्कृषो॥संख्यायाश्चगुणानायाः॥समयाच्चयापनायां॥
॥३॥सपत्रनिष्पत्रादतिव्यथने॥निकुलानिरोधे॥सुखप्रियादानुलोम्ये॥दुःखा
त्प्रातिलोम्ये॥शूलाद्पाके॥सत्यादशपथे॥मद्रात्परिवापणे॥समासंतः॥नपूजनात्॥
किमःक्षेपे॥नञःस्तत्पुरुषात्॥पथोविभाषा॥बहुव्रीहौसंख्येयेडजबहुगणात्॥ऋक्
पूरब्धूःपथामानक्षे॥अच्प्रत्यन्ववपूर्वात्सामलोम्नः॥अक्ष्णोदर्शनात्॥अचतुर
विचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसाक्षिभ्रुवदारगवोर्वष्ठीवपदष्ठी
वनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्य ॥३९॥

जुपजातोक्षमहोक्षवृद्धोक्षोपशुनगोष्ठश्वाः॥ब्रह्महस्तिधेनुवर्चसः॥अवसमंधोभ
क्तमसः॥श्वसोवसीयःश्रेयसः॥४॥अन्ववतप्तादहसः॥प्रतेरूरसः सप्तमीस्थात्॥
अनुगवमायामे॥द्वित्राद्वास्तावतिः॥उपसर्गादध्वनः॥नत्पुरुषस्यागुलेःसं
ख्योद्ययादेः॥अहःसर्वैकदेशसंख्यातपुण्याच्चरात्रेः॥अह्नोऽह्नएतेभ्यः॥नसंख्या
देःसमाहारे॥उत्तमैकाभ्यांच॥राजाहःसखिभ्यष्टच्॥गोरतद्धितलुकि॥अग्नाख्या
यामुरसः॥अनश्मायःसरसांतानिसंज्ञयोः॥ग्रामकौटाभ्यांचतक्ष्णः॥अतेःशुनः॥
उपमानादप्राणिषु॥उत्तरमृगपूर्वाच्चसक्थ्नः॥नाबोद्विगोः॥अर्धाच्च॥५॥स्वार्थाः
प्राचां॥द्वित्रिभ्यामंजलेः॥अनसंतान्नपुंसकाच्छंदसि॥ब्रह्मणोजानपदाख्या
यां॥कुमहद्भ्यामन्यतरस्यां॥हृदयस्यगुणवचनातिसमाहारे॥अव्ययीभावेशरत्प्र

भृतिभ्यः॥ अनश्च॥ नपुंसकादन्यतरस्यां॥ ङीषीष्वौपम्यात्याख्यायणीभ्यः॥ स्वयं॥ ङिसश्वसेनकस्य॥ बहुव्रीहौसंख्येयेऽशिस्वागात्वच॥ अंगुलेर्दारुणि॥ द्वित्रियामम्॥ अप्पूरपीप्रमाण्योः॥ अंतर्बहिर्यत्तिलोभूः॥ अजनासिकायाः संज्ञायांनसंचारस्थूलात्॥ उपसर्गाच॥ सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्रेणीपदाजपदप्रोष्ठपदाः॥ ६॥ नञ्दुःसुभ्यो हलिसक्थ्योरन्यतरस्यां॥ नियमसिचप्रजामेधयोः॥ बहुप्रजाश्छन्दसि॥ धर्मादनिच्केवलात्॥ अंभासुहरितरुपासोमेभ्यः॥ दक्षिणोर्मालुब्धयोगे॥ इच्कर्मव्यतिहारे॥ द्विदंड्यादिभ्यश्च॥ प्रसभंयजानुनोर्लुः॥ ऊर्ध्वाद्विभाषा॥ ऊधसोनङ्॥ धनुषश्च॥ वासंज्ञायां॥ जायायानिङ्॥ गंधस्येदुत्सूतिसुसुरभिभ्यः॥ अल्पाख्यायां॥ उपमानाच्च॥ पादस्यलोपोहस्त्यादिभ्यः॥ कुंभपदीषुच॥ संख्यासुपूर्वस्य॥ ७॥ वयसिदंतस्य

GOVERNMENT OF INDIA

दत्॥ छंदसिच॥ स्त्रियांसंज्ञायां॥ विभाषास्यावारोकाभ्यां॥ अग्रांतशुद्धशुभ्रवृषवराहेभ्यश्च॥ ककुदस्यावस्थायांलोपः॥ त्रिककुत्पर्वते॥ दृष्टेभ्यांकाकुदस्य॥ पृषोदरादिभाषा॥ सुहृद्दुर्हृदौमित्रामित्रयोः॥ उरःप्रभृतिभ्यःकप्॥ इनस्त्रियां॥ नद्यृतश्च॥ शेषाद्विभाषा॥ नसंज्ञायां॥ ईयसश्च॥ बंदिताभ्रातुः॥ ऋतश्छंदसि॥ नाडीतंत्र्योःस्वांगे॥ निष्प्रवाणिश्च॥ ८॥ पादस्यातस्यतत्प्रभृतयत्कसपत्रान्नवस्त्रयोर्नञ्वयसिवयंसिदंत्रतिः॥ चतुर्थःपादः॥ पंचमाध्यायःसमाप्तः॥ एकाचोद्वेप्रथमस्य॥ अजादेर्द्वितीयस्य॥ नंद्राःसंयोगादयः॥ पूर्वेभ्यासः॥ उभेअभ्यस्तं॥ जक्षित्यादयःषट्॥ तुजादीनांदीर्घोभ्यासस्य॥ लिटिधातोरनभ्यासस्य॥ सन्यङोः॥ श्लौ॥ चङि॥ दाश्वान्साह्वान्मीढ्वांश्च॥ ष्यङः संप्र

सारणंपुत्रपस्योस्तसुरुवे॥ बंधुनिबऊश्रीहो॥ वचिस्वपियजादीनांकिति॥ ग्रहिज्याव
यिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनांङिति च॥ लिद्यभ्यासस्योभयेषां॥ स्वा
पेश्चङि॥ स्वपिस्यमिव्येञांयङि॥ नवृद्राः॥१॥ चायःकी॥ स्फायःस्फीनिधायां॥ स्य
प्रपूर्वस्य॥ इवमूर्तिस्पृशोश्यः॥ प्रतेश्च॥ विभाषाभ्यवपूर्वस्य॥ श्रतपाके॥ व्यायः
पी॥ लिप्यङोश्च॥ विभाषाश्वेः॥ णौचसंश्चङोः॥ ह्वःसंप्रसारणं॥ अभ्यस्तस्यच॥ ब
हुलंछंदसि॥ चायःकी॥ अपस्पधेथामानृचुरानृक्षुश्चिच्युषेतिव्याजश्रीताः श्रित
मानृक्षीरतीर्तुः॥ नसंप्रसारणेसंप्रसारणं॥ लिटिवयोयः॥ वश्चोस्थान्यतरस्यां
किति॥ वेञः॥ त्यपिच॥ व्यश्च॥ व्यश्च॥ विभाषापरेः॥ आदिचउपदेशेशिति॥ न व्योलि ॥४१॥
टि॥ स्फुरतिस्फुलत्योर्घञि॥ क्रीङ्जीनांणौ॥ सिध्यतेरपारलौकिके॥ मीनातिमि

नोतिदीङांत्यपिच॥ विभाषालीयतेः॥ रिवदेश्छंदसि॥ अपगुरोमृदुलि॥ चिस्फुरोर्णौ॥
प्रजनेवीयतेः॥ बिभेतेर्हेतुभये॥ नित्यंस्मयतेः॥ सृजिदृशोर्झल्यमकिति॥ अनुदात्तं
नस्यचर्दुपधस्यान्यतरस्यां॥ शीर्षश्छंदसि॥३॥ येचतद्धिते॥ अचिश्नुधातुभ्रुवां॥ पद्दन्नो
मासह्नन्निशसन्यूषन्दोषन्यकन्यृघकन्नुदन्नासञ्छस्प्रभृतिषु॥ धात्वादेःषःसः॥
णोनः॥ लोपोव्योर्वलि॥ वेरपृक्तस्य॥ हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल्॥ एङ्ह्रस्वात्सं
बुद्धेः॥ शेश्छंदसिबहुलं॥ ङ्यापोःसंज्ञाछंदसिबहुलं॥ संहितायां॥ छेच॥ आङ्या
ङोश्च॥ दीर्घात्॥ पदांतात्॥ इकोयणचि॥ एचोयवायावः॥ वांतोयिप्रत्यये॥ धातो
स्तन्निमित्तस्यैव॥ ४॥ क्ष्यञक्ष्योःशक्ष्यर्थे॥ ऋय्यस्तदर्थे॥ भय्यप्रवय्येचछंदसि॥
एकःपूर्वपरयोः॥ अंतादिवच्च॥ षत्वतुकोरसिद्धः॥ आद्गुणः॥ वृद्धिरेचि॥ एत्ये

धत्यूदसु॥आटश्च॥उपसर्गादृतिधातौ॥वासुप्यापिशलेः॥ओतोम्शसोः॥एङि पररूपं॥
ओमाङोश्च॥उस्यपदान्तात्॥अतोगुणे॥अव्यक्तानुकरणस्यात इतौ॥नामेडितस्यान्त्यस्य
लुक्॥नित्यमाम्रेडितेडाचि॥५॥अकः सवर्णेदीर्घः॥प्रथमयोः पूर्वसवर्णः॥तस्माच्छसोनः
पुंसि॥नादिचि॥दीर्घाज्जसिच॥वाच्छंदसि॥अमिपूर्वः॥संप्रसारणाच्च॥एङः पदान्तादति॥
ङसिङसोश्च॥ऋतउत्॥ङ्याप्प्रातिपदिकात्॥अतोरोरप्लुतादप्लुते॥हशिच॥प्रकृत्यान्तःपाद
मव्यपरे॥अव्यादवद्यादवक्रमुरव्रतायमवंत्ववस्युवुचं॥यजुष्यूरः॥आपोजुषाणोवृ
ष्णोवर्षिष्ठेंबेनाकेंबिकेपूर्वी॥अंगइत्यादौच॥अनुदात्तेचकुधपरे॥६॥अनपेथासिच॥
सर्वत्रविभाषागोः॥अवङ्स्फोटायनस्य॥इंदेचिनेयं॥प्लुतप्रगृह्याअचि॥आङोनु ॥४२॥
नासिकश्छंदसि॥एकोसेवर्योरगाकल्यस्यङ्सश्च॥ऋत्येकः॥अप्लुतवदुपस्थिते॥

ईचाक्रवर्मणस्य॥दिवउत्॥एतत्तदोः सुलोपोकोरनञ्समासेहलि॥स्यश्छंदसिबहुलं॥
सोचिलोपेचेत्पादपूरणे॥सुट्कात्पूर्वः॥अडभ्यासव्यवायेपि॥संपर्युपेभ्यः करोतौभू
षणे॥समवायेच॥उपास्त्रातियत्नवैकृतनाम्न्याध्याहारेषु॥किरतौलवने॥७॥हिंसा
यांप्रतेश्च॥अपाच्चतुष्पाच्छकुनिष्वालेखने॥कुस्तुंबुरूणिजातिः॥अपरस्पराःक्रिया
सातत्ये॥गोष्पदंसेवितासेवितप्रमाणेषु॥आस्पर्दंप्रतिघायां॥आश्चर्यमनित्ये॥वर्च
स्केवस्करः॥अपस्करोरथांगे॥विष्किरःशकुनिर्विकिरोवा॥इक्ष्वांदोनरपदेमंत्रे॥प्र
तिष्कशश्वकृतोः॥प्रस्कण्वहरिश्चंद्रावृषी॥मस्करमस्करिणौवेणुपरिव्राजकयोः॥का
स्तीराजस्कंदेनगरे॥कारस्करोवृक्षः॥पारस्करप्रभृतीनिचसंज्ञायां॥अनुदात्तंपद
मेकवर्जं॥कर्षात्वतोघञोंतउदात्तः॥उंछादीनांच॥८॥अनुदात्तस्यचयत्रोदात्तलोपः॥

धातोः॥ चितः॥ तद्धितस्य॥ कितः॥ तिस्रभ्यो जसः॥ चतुरः शसि॥ सावेकाचस्तृतीयादिर्विभ
॥४३॥ क्तिः॥ अंतो यत्तादुत्तरपदादन्यतरस्यामनित्यसमासे॥ अंचेश्छन्दस्यसर्वनामस्था
नं॥ डुडिदपरा घप्शुभ्रेभ्यः॥ अष्टनो दीर्घात्॥ रातुरनुनासिकेनाजादी॥ उदात्तयणो हल्
पूर्वात्॥ नोङ्धात्वोः॥ ङ्यापोः संज्ञाछन्दसि बहुलं॥ षड्
भ्यश्चतुर्भ्यो हलादिः॥ सप्तम्युपमानं॥ ९॥ विभाषाभाषायां॥ नगोश्वन्साववर्णराड्ङुङ्
क्ङ्यः॥ दिवो झल्॥ रुचोन्यतरस्यां॥ तिस्वरितं॥ नास्यनुदात्तेनिदुपदेशाल्सार्व
धातुकमनुदात्तमार्धधातुकेः॥ आदिःसिचोन्यतरस्यां॥ स्वपादिहिंसामच्यनिटि॥ अभ्यस्ता
नामादिः॥ अनुदात्तेच॥ सर्वस्यसुपि॥ भीह्रीभृहुमदजनधनदरिद्राजागरांप्रत्य ॥४३॥
यासूर्वपिति॥ लिति॥ आदिर्णमुल्यन्यतरस्यां॥ अचःकर्तृयकि॥ थलिचसेटीडंतोवा॥

ञ्नित्यादिर्नित्यं॥ आमंत्रितस्यच॥ पथिमथोः सर्वनामस्थाने॥ अंतश्चतवैयुगपत्॥ १०॥
क्षयानिवासे॥ जयःकरणं॥ वषट्कारेभ्यश्च॥ संज्ञायामुपमानं॥ निष्ठाचद्यजनात्॥ भुवश्च
ष्टौ॥ आशितःकर्ता॥ रिक्तेविभाषा॥ नृषार्पितेच्छंदसि॥ नित्यंमंत्रे॥ युष्मदस्मदोङसि॥
ङयिच॥ यतोनावः॥ ईडवंदवृंसदुहाण्यतः॥ विभाषाबेण्विधानयोः॥ यागरागहास
कुहश्चठक्थानां॥ उपोत्तमंरिति॥ चङ्यन्यतरस्यां॥ मतोःपूर्वमात्संज्ञायांस्त्रियां॥ अं
तोवत्याः॥ १९॥ ईवत्याः॥ चौ॥ समासस्य॥ १२॥ एकाचश्चाद्योत्पियेच्छय्यजय्याव
कंसवर्णेवपथासिहिंसायामनुदात्तस्यविभाषाक्षयईवत्यास्त्रीपि॥ प्रथमः पादः
बहुव्रीहौप्रकृत्यापूर्वपदं॥ तत्पुरुषेतुल्यार्थैरतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः॥
वर्णोवर्णेघनेते॥ गोधलवणयोः प्रमाणे॥ दायाद्यंदायादे॥ प्रतिबंधिचिरकृच्छ्रयोः॥

पदे पदेशे॥ नियाते वात्राणे॥ रारदे नार्तवे॥ अध्वर्युकषाय योर्जानौ॥ सदृशप्रतिरूपयोः सादृश्ये॥ द्विगौ प्रमाणे॥ गंतव्यपण्ये वाणिजे॥ मात्रापत्रापक्रमछाये नपुंसके॥ सुरवप्रिययोर्हिते॥ प्रीतौ च॥ स्वं स्वामिनि॥ पत्या वैश्वर्ये॥ नभूवाकृषिषु॥ नाभुवं॥१॥ आशंकाबाधनेदीयः सुसंभावने॥ पूर्वभूतपूर्वे॥ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये॥ विस्पष्टादीनिगुणवचनेषु॥ श्रुत्यावमकन्यापूवत्सभावेकर्मधारये॥ कुमारश्च॥ आदिःप्रत्येनसि॥ पूर्वेषुन्यतरस्यां॥ ईगंतकालपोकेलभागालशरावेषुद्विगौ॥ बहून्यतरस्यां॥ दिष्टिवितस्योश्च॥ सप्तमीसिद्धशुष्कपक्वबंधेष्वकालात्॥ परिप्रत्यपापावर्ज्यमानाहोरात्रावयवेषु॥ राजन्यबहुवचनद्वंद्वेषु॥ संख्या॥ आर्यीचापसर्जनश्चांतेवासी॥ कार्तकौजपादयश्च॥ महान्व्रीहि॥ ॥४४॥

पराह्णगृष्ठीघासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु॥ क्षुल्लकश्ववैश्वदेवे॥ उष्ट्रःसादिवाम्योः॥२॥ गोःसादसादिसारथिषु॥ कुरुगार्हपतारण्यगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकुद्रुःपण्यकंबलोदासीभारापांच॥ चतुर्थ्यर्थे॥ अर्थे॥ क्वेच॥ कर्मधारयेनिष्ठा॥ अहीनेद्वितीया॥ तृतीयाकर्मणि॥ गतिरनंतरः॥ तादौचनितिकृतौ॥ तवैचांतश्चयुगपत्॥ अनिगंतोंचतौवप्रत्यये॥ न्यधीच॥ ईषदन्यतरस्यां॥ हिरण्यपरिमाणंधने॥ प्रथमोचिरोपसंपन्नो॥ कलरकृतमोकर्मधारये॥ आर्योब्राह्मणकुमारयोः॥ राजाच॥ षष्ठीप्रत्येनसि॥ ३॥ क्तेनित्यार्थे॥ ग्रामःशिल्पिनि॥ राजाचप्रशंसायां॥ आदिरुदात्तः॥ सप्तमीहारिणौधर्म्यहरणे॥ युक्तेच॥ विभाषाध्यक्षे॥ पापंचशिल्पिनि॥ गोत्रांतेवासिमाणवब्राह्मणपोषुक्षेपे॥ अंगानिभेदये॥ भक्ता

ख्यास्तदर्थेषु॥ गोबिडालसिंहसैंधवेषूपमाने॥ अकेजीविकार्थे॥ प्राचां क्रीडायां॥ अणिनि
युक्ते॥ शिल्पिनिचाकञः॥ संज्ञायांच॥ गोतंतियवंपाले॥ णिनि॥ उपमानंशब्दार्थप्रकृ
तावेव॥४॥ युक्तारोह्यादयश्च॥ दीर्घकाशतुषभ्राष्ट्रवटंजे॥ अंत्यात्पूर्वबह्वचः॥ ग्रामनि
वसंतः॥ घोषादिषुच॥ छात्र्यादयःशालायां॥ प्रस्थेऽवृद्धमकर्क्यादीनां॥ मालादीनांच॥
अमहन्नवन्नगरेनुदीचां॥ अर्म्मेचावर्णद्व्यचष्ट्यच॥ नभूताधिकसंजीवमद्राश्मकंजलं॥
अंतः॥ सर्वंगुणकात्स्न्र्ये॥ संज्ञायांगिरिनिकायेषु॥ कुमार्यांवयसि॥ उदकेकेवले॥
द्विगौक्रतौ॥ सभायांनपुंसके॥ पुरेप्राचां॥ अरिष्टगौडपूर्वेच॥ ५॥ नहास्तिनफलकमा
देर्द्यां॥ कुसूलकूपकुंभशालबिले॥ दिक्शब्दाग्रामजनपदाख्यानचानराटेषु॥ आ ॥४५॥
चार्योपसर्जनश्चांतेवासिनि॥ उत्तरपदवृद्धौसर्वंच॥ बहुव्रीहौविश्वंसंज्ञायां॥ उद

राश्वेषुषु॥ क्षेपे॥ नदीबंधुनि॥ निष्ठोपसर्गपूर्वमन्यतरस्यां॥ उत्तरपदादिः॥ कर्णेवर्णलक्ष
णात्॥ संज्ञौपम्ययोश्च॥ कंठपृष्ठग्रीवाजंघंच॥ शृंगमवस्थायांच॥ नञोजरमरमित्र
मृताः॥ सोर्मनसीअलोमोषसी॥ ऋक्पूरब्धूःपथामानक्षे॥ अद्युत्तरपदाट्ठञ्कसौ॥ वीरवीर्यौच
॥६॥ कूलतीरतूलमूलशालासममव्ययीभावे॥ कंसमंथभूर्पपाय्यकाडंडिगौ॥ न
सुरूपेशालायांनपुंसके॥ कंथाच॥ आदिश्चिहणादीनां॥ चेलखेटकटुककाडंगर्हायां॥
चीरमुपमानं॥ पललसूपशाकंमिश्रे॥ कूलसूदस्थलकर्षाःसंज्ञायां॥ अकर्मधारये
राज्यं॥ वर्ग्यादयश्च॥ पुत्रःपुंभ्यः॥ नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः॥ चूर्णादीन्य
प्राणिषष्ठ्याः॥ षट्चकाण्डादीनि॥ कुंडंवनं॥ प्रकृत्यैभगालं॥ शितेर्निर्याबहुब्रीहौ
ऊधीलावपसत्॥ गतिकारकोपपदात्कृत्॥ तत्पुरुषेवनस्पत्यादिषुयुगपूः॥ ७॥ देवता

दंडेच॥नोत्तरपदेनुदात्तादावपृथिवीरुद्रपूषमंथिषु॥अंतः॥थाथघञ्क्ताजबित्रकाणां॥
सूपमानात्क्तः॥संज्ञायामनाचितादीनां॥प्रष्टहादीनांच॥कारकादक्तश्चेत्यारेवाङ्गाधे॥
इत्थंभूतेनकृतमितिच॥अनोभावकर्मवचनः॥मन्क्तिन्व्याख्यानशयनासनस्था
नयाजकादिक्रीताः॥सप्तम्याः पुण्यं॥उनार्थकतृतीयायाः॥मिश्रंचानुपसर्गम
संधौ॥नञोगुणप्रतिषेधेसंपाद्यर्हितालमर्थास्तादिनाः॥यतोश्रातदर्थे॥अच्
कावशक्तौ॥आक्रोशेच॥संज्ञायां॥कृत्योकेलुग्वाव्ययश्च॥८॥विभाषातृन्नतृ
क्षुशीपु॥बहुव्रीहावितरेतन्नञ्भ्यः प्रथमपूरणयोः क्रियागणने॥संख्यायास्तनः॥
विभाषाछंदसि॥संज्ञायामित्राजिनयोः॥व्यवायिनोंतरं॥मुखंस्वांगं॥नाव्ययदिक्॥४६॥
शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः॥निषेधोपमानादन्यतरस्यां॥जातिकाल

सुखादिभ्यो नाच्छादनात्कृतमितप्रतिपन्नाः॥वाजातेनञ्स्वभ्यां॥कपिपूर्वात्॥कृत्वो
र्थसूर्वात्॥बहोर्नञ्वदुत्तरपदभूम्नि॥नगुणादयोवयवाः॥उपसर्गात्स्वांगंध्रुवम
पर्शु॥वनंसमासे॥अंतः॥अंतश्च॥९॥ननिविभ्यां॥परेरभितोभावि मंडलं॥प्रादस्वां
गंसंज्ञायां॥निरुदकादीनिच॥अभेर्मुखं॥अपाच॥स्फिगपूतवीणांजोर्ध्वकुक्षिसीर
नामनामच॥अधेरुपरिस्थं॥अनोरप्रधानकनीयसी॥पुरुषश्चान्वादिष्टः॥अतेरकृ
त्से॥नेरनिधाने॥प्रतेरंशुवादयस्तत्पुरुषे॥उपाद्यजजिनमगोरादयः॥सोरवक्षे
पणे॥विभाषोत्पुच्छे॥द्वित्रिभ्यांपाद्दन्मूर्धसुबहुव्रीहौ॥सक्थ्यंचाङ्गात्॥पराद
श्छंदसिबहुलं॥१०॥बहुव्रीहावाशंकागौः सादृश्येनित्यार्थे युक्तानहास्तिनकूल
तीरदेवताविभाषाननित्येकोनविंशतिः॥इतिषष्ठाध्यायस्यद्वितीयः पादः॥

अलुगुत्तरपदे॥ पंचम्यास्तोकादिभ्यः॥ ओजःसहोंभस्तमसस्तृतीयायाः॥ मनसः संज्ञा
यां॥ आज्ञायिनि च॥ आत्मनश्चपूरणे॥ वय्याकरणाख्यायांचतुर्थ्याः॥ पुरस्य च॥ हलदंता
॥४७॥ सप्तम्याः संज्ञायां॥ कारनाम्नि च प्राचांहलादौ॥ मध्याद्गुरौ॥ अमूर्धमस्तकात्स्वांगाद
कामे॥ बंधे चविभाषा॥ तत्पुरुषेकृतिबहुलं॥ प्रावृट्शरत्कालदिवोजे॥ विभाषावर्षक्ष
रशरवरात्॥ घकालतनेषुकालनाम्नः॥ नयायासंक्षेपेषुकालात्॥ नक्षत्रेऽबंभाति
षुच॥ स्फेचभाषायां॥ १॥ षष्ठ्याआक्रोशे॥ पुत्रेन्यतरस्यां॥ ऋतोविद्यायोनिसंबंधे
भ्यः॥ विभाषासपूर्वस्यै॥ आनङृतोद्वंद्वे॥ देवताद्वंद्वेच॥ ईदग्नेःसोमवरुणयोः॥
द्यद्भ्यो॥ दिवोद्यावा॥ दिवसश्चपृथिव्यां॥ उषासोषसः॥ मातरपितरावुदीचां॥ पि ॥४७॥
तरामातराच्छंदसि॥ स्त्रियाःपुंवद्भाषितपुंस्कादनूङ्समानाधिकरणेस्त्रिया

मपूरणीप्रियादिषु॥ नासिकादिषुचोत्तरपदेषु॥ क्यङ्मानिनोश्च॥ नकोपधायाः॥ संज्ञा
पूरण्योश्च॥ दृढादिनिमित्तस्यचतदितस्याद्युत्तरपदविकारे॥ स्वांगाच्चेतोमानिनि॥ २॥ जातेश्च॥
पुंवत्कर्मधारयजातीयदेशीयेषु॥ घरूपकल्पचेलड्रुवगोत्रमतहतेष्वनेकाचोऽ
न्त्यादेः॥ नद्यांशोषस्यान्यतरस्यां॥ उगितश्च॥ आन्महतःसमानाधिकरणजातीययोः॥
द्व्यष्टनःसंख्यायामबह्वचीत्योः॥ त्रेस्त्रयः॥ विभाषाचत्वारिंशत्प्रभृतौसर्वेषां॥
हृदयस्यहृल्लेखयदण्लासेषु॥ वाचोकष्यक्षरोगेषु॥ पादस्यपदाज्यातिगोपहतेषु॥
पद्यत्यतदर्थे॥ हिमकाषिहतिषुच॥ ऋचःशे॥ बाष्पोष्मिश्रशब्देषु॥ उदकस्योदःसं
ज्ञायां॥ पेषंवासवाहनधिषुच॥ एकहलादौपूरयितव्येन्यतरस्यां॥ मंथौदनसक्तुबिं
दुवज्रभारहारवीवधगाहेषुच॥ ३॥ इकोऽल्पाख्यौगालवस्य॥ एकतद्धितेच॥

ङ्यापोः संज्ञाछंदसोर्बहुलं॥ लेच॥ इष्टकेषीकामालानांचितत्तूलभारिषु॥ रिक्तेविभाषा॥ रिक्तेति विभाषा ग्रहणमनुवर्तते॥ रिक्तेनित्यंक्ङिति॥ अकर्तरीषज्जंतस्यसुम्॥ इच एकाचोम्प्रत्ययवच्च॥ वाचंयमपुरंदरौच॥ कारे सत्यागदस्य॥ धृषेनतिलस्यपातेत्रे॥ रात्रेःकृतिविभाषा॥ नलोपोनञः॥ तस्मान्नुडचि॥ नभ्राण्नपान्नवेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्या॥ एकादिश्चैकस्यचादुक्॥ नगोप्रतिषेधन्यतरस्याम्॥ सहस्यसः संज्ञायाम्॥ ग्रंथांतेधिके च॥ द्वितीयेचानुपाख्ये॥ ४॥ अव्ययीभावेचाकाले॥ वोपसर्जनस्य॥ प्रकृत्याशिष्यगोवत्सहलेषु॥ समानस्यच्छंदस्यमूर्धप्रभृत्युदर्केषु॥ ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयोवचनबंधुषु॥ चरणेब्रह्मचारिणि॥ तीर्थेये॥ विभाषोदरे॥ दृग्दृशवतुषु॥ इदंकिमोरीश्की॥ आसर्वनाम्नः॥ विष्वग्देवयोश्चटेरद्र्यंचतावप्रत्यये॥ समःसमि॥

तिरसस्तिर्यलोपे॥ सहस्यसध्रिः॥ सधमादस्थयोश्छंदसि॥ घ्यंतरूपसर्गेभ्योपई॥ ऊदनोदेशे॥ अषष्ठ्यतृतीयास्थस्यान्यस्यदुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु॥ अर्थेविभाषा॥ ५॥ कः कत्करूचि॥ रथवदयोश्च॥ त्रपोचजातौ॥ कापथ्यक्षयोः॥ ईषदर्थे॥ विभाषापुरुषे॥ कंवचोशे॥ पथिच्छंदसि॥ एषोदरादीनियथोपदिष्टं॥ संख्याविसायपूर्वस्याह्नस्याह्नन्यतरस्यांङे॥ हृदुलोपेपूर्वस्यदीर्घोणः॥ सहिवहोरोदवर्णस्य॥ साढ्येसाढासाढेतिनिगमे॥ संहितायां॥ कर्पूरेक्षपास्यापिषष्ठपंचमणिभिन्नछिन्नछिद्रुवंःस्वस्तिकस्य॥ नहिवृतिवृषिव्यधिरुचिसहितनिषुकौ॥ वनगिर्योःसंज्ञायांकोटरकिंशुलकादीनां॥ बले॥ मतोबह्वचोनजिरादीनां॥ शरादीनांच॥ ६॥ इकोवहेपीलोः॥ उपसर्गस्यघञ्यमनुष्येबहुलं॥ इकः काशे॥ दस्ति॥

अहनः संज्ञायां॥ छंदसि च॥ चितेः कपि॥ विश्वस्य वसुराटोः॥ नरे संज्ञायां॥ मित्रे चर्षौ॥ मंत्रे सोमाश्वेंद्रियविश्वदेव्यस्य मतौ॥ ओषधेश्च विभक्तावप्रथमायां॥ ऋचि तुनुघमक्रतूक्थादिसूत्रभक्तिषु॥ कुत्वोरुष्याणां॥ इकः सुञि॥ च्वौ च॥ तस्मिन्निति निमित्तसप्तम्यौ॥ निपातस्यैकाचोऽनभ्यासस्य॥ अन्येषामपि दृश्यते॥ चौ॥ संप्रसारणस्य॥ ७॥ अत्र कृष्यादयो विकरणविकाराः॥ षष्ठ्याध्यायस्य तृतीयः पादः॥ अंगस्य॥ हलः॥ नामि॥ नृति स्वपि सर्ति॥ छंदस्युभयथा॥ र्तृच॥ नोपधायाः॥ सर्वनामस्थाने चासंबुद्धौ॥ बहुपूर्वस्य निगमे॥ सांतमहतः संयोगस्य॥ अपृक्तसर्वस्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तॄणां॥ ह्रस्वः॥ संबुद्धौ॥ सौच॥ अत्वसंतस्य चाधातोः॥ अनुनासिकस्यक्विझलोः क्ङिति॥ अज्झनगमां सनि॥ तनोतेर्विभाषा॥ क्रमश्चाक्ङिति॥ घ्वोः शूडनुनासिके च॥ अरुर्द्विषदजन्तस्य मुम्॥ १॥

राल्लोपः॥ असिद्धवदत्राभात्॥ श्नान्नलोपः॥ अनिदितां हल उपधायाः क्ङिति॥ दंशसंजस्वंजां शपि॥ रंजेश्च॥ घञि च भावकरणयोः॥ स्यतासी लृलुटोः॥ स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनगमां सनि॥ मनः॥ तनोत्यादीनां मनुनासिकलोपो झलि क्ङिति॥ वा ल्यपि॥ नक्रिचि दीर्घश्च॥ गमः क्वौ॥ २॥ विड्वनोरनुनासिकस्यात्॥ जनसनखनां सन्झलोः॥ येऽविभाषा॥ तनोतेर्यकि॥ सनः क्तिचि लोपश्चास्यान्यतरस्यां॥ आर्धधातुके॥ भ्रस्जो रोपधयो रमन्यतरस्यां॥ अतो लोपः॥ यस्य हलः॥ क्यस्य विभाषा॥ घोरनिटि॥ निष्ठायां सेटि॥ जनिताबंत्रे॥ क्षामितायज्ञे॥ अयामंतान्वाय्येत्निषु॥ ल्यपि लघुपूर्वात्॥ विभाषापः॥ युष्मदस्मदोरन्यतरस्यां खञि॥ शेषे॥ निष्ठायामण्यदर्थे॥ ३॥

वाक्रोशदैन्ययोः॥ स्यसिचसीयुट्तासिषुभावकर्मणोरुपदेशेज्झनग्रहदृशांवाचिण्वदिक्ङिति॥
दीङोयुडचिक्ङिति॥आपतोलोपइटिच॥ईद्यति॥घुमास्थागापाजहातिसांहलि॥एर्लिङि॥
यान्यस्यसंयोगादेः॥नित्यपि॥मयतेरिदन्यतरस्यां॥लुङ्लङ्लृङ्क्ष्वडुदात्तः॥आडजा
दीनां॥छन्दस्यपिदृश्यते॥नमाङ्योगे॥बहुलंछन्दस्यमाङ्योगेपि॥इरयोरे॥अचिश्नुधा
तुभ्रुवांय्वोरियङुवङौ॥अभ्यासस्यासवर्णे॥स्त्रियाः॥वामशसोः॥४॥इणोयण्॥एर
नेकाचोसंयोगपूर्वस्य॥ओःसुपि॥वर्षाभ्यश्च॥नभूसुधियोः॥छन्दस्युभयथा॥ऊङ्ऋतः
सार्वधातुके॥भुवोवुग्लुङ्लिटोः॥ऊदुपधायागोहः॥दोषोणौ॥वाचिनयमे॥मितांह्र
स्वः॥चिण्णमुलोर्दीर्घोन्यतरस्यां॥खचिह्रस्वः॥ह्लादानिष्यायां॥छादेर्घेद्व्युपसर्गस्य॥
इस्मन्नन्क्विषुच॥गमहनजनखनघसांलोपःक्ङित्यनङि॥तनिपत्योश्छन्दसि॥

घसिभसोर्हलिच॥५॥ऊदृतोरोर्हि॥श्रुशृणुपृकृवृभ्यश्छन्दसि॥अङितश्च॥चिणो
लुक्॥अतोहेः॥उतश्चप्रत्ययादसंयोगपूर्वात्॥लोपश्चास्यान्यतरस्यांम्वोः॥नित्यंकरो
तेः॥येच॥अतउत्सार्वधातुके॥श्नसोरल्लोपः॥श्नाभ्यस्तयोरातः॥ईहल्यघोः॥ईदिति
इस्य॥भियोन्यतरस्यां॥जहातेश्च॥आच्चले॥लोपोयि॥घ्वसोरेद्धावभ्यासलोपश्च॥
अनेकहल्मध्येनादेशादेर्लिटि॥६॥थलिचसेटि॥ऋफलभजत्रपश्च॥राधोहिंसा
यां॥वाऽऽशीर्लिङि॥फणांचसप्तानां॥नशसददवादिगुणानां॥अर्वणस्त्रसावन
ञः॥मघवाबहुलं॥भस्य॥पादःपत्॥नसोःसंप्रसारणं॥वाहऊठ्॥श्वयुवमघोना
मतद्धिते॥अल्लोपोनः॥षपूर्वहन्धर्मराजामणि॥विभाषाङिरयोः॥नसंयोगाद्धलं
नात्॥अचः॥उदईत्॥आतोधातोः॥७॥मन्त्रेघाह्वाद्रात्मनः॥तिबिरीतेर्ङिति॥टेः॥

नस्तादिते॥ अङ्कष्वोरेव॥ ओर्गुणः॥ टेर्लोपोकढौ॥ यस्येतिच॥ सूर्यतिष्यागस्त्यमत्स्यानां
॥५१॥ यउपधायाः॥ हलस्तद्धितस्य॥ आपत्यस्यचतद्धितेनाति॥ वयच्योश्च॥ बिल्वकादिभ्य
श्छस्यलुक्॥ तुरिष्ठेमेयःसु॥ टेः॥ स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणांयणादिपरंपूर्व
स्यचगुणः॥ प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृंदारकाणांप्रस्थस्फवे
र्बंहिगर्वर्षिबाढाढ्यवृंदाः॥ बहोर्लोपोभूच्चबहोः॥ रष्वयिड्या॥ ज्यादादीयसः॥८॥
रऋतोहलादेर्लघोः॥ विभाषाजेश्छंदसि॥ प्रत्ययेकान्॥ इनण्यनपत्ये॥ गाथिविदथिके
शिगणिपणिनश्च॥ संयोगादिश्च॥ अन्॥ येचाभावकर्मणोः॥ आत्माध्वानौखे॥ नम
पूर्वोपत्येवर्मणः॥ श्राद्धोजातौ॥ कार्मस्ताच्छील्ये॥ औक्षमनपत्ये॥ दाडिनायनहास्ति ॥५१॥
नायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यैवस्यसारवैश्वाकमैत्रेयहि

रण्मयानि॥ ऋत्यवास्त्यवास्त्वमाध्वीहिरण्ययानिछंदसि॥ ९॥ अंगस्यरालोपोवि
धूनोधीक्रोडाणोऽङ्गसङ्घलिचमंत्रेषुरऋतःपंचदश॥ चतुर्थःपादः॥ इतिषष्ठाध्या
यःसमाप्तः॥ ॐम्॥ युगोरनाकौ॥ आयनेयीनीयियःफढखछघांप्रत्ययादीनां॥ द्वो
तः॥ अरुर्द्विषदजन्तस्यमुम्॥ आत्मनेपदेष्वनतः॥ शीङोरुट्॥ वेतेर्विभाषा॥ बहुलंछंदसि॥ अ
तोभिसऐस्॥ बहुलंछंदसि॥ नेरमदसोरकोः॥ टाङसिङसामिनात्स्याः॥ ङेर्य्यः॥
सर्वनाम्नस्मै॥ ङसिङ्योस्मात्स्मिनौ॥ पूर्वादिभ्योनवभ्योवा॥ जसःशी॥ ओङआपः॥
नपुंसकाच्च॥ जःशसोःशिः॥ १॥ अष्टाभ्य औश्॥ षड्भ्योलुक्॥ स्वमोर्नपुंसकात्॥
अतोम्॥ अष्टनआदिभ्यः॥ नेतराच्छंदसि॥ युष्मदस्मद्भ्यांङसोश्॥ ङेप्र
थमयोरम्॥ शसोन॥ भ्यसोभ्यम्॥ पंचम्याअत्॥ एकवचनस्यच॥ सामआक्॥

आत ओपालः ॥ तुह्योस्तातङ्ङाशिष्यन्यतरस्यां ॥ विदेः शतुर्वसुः ॥ समासेनञ्पूर्वेक्त्वि
॥५२॥ ल्यप् ॥ क्वापिच्छंदसि ॥ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ॥ अमोमश् ॥ २ ॥
लोपस्त आत्मनेपदेषु ॥ ध्वमोधात् ॥ यजध्वैनमिति च ॥ तस्यतात् ॥ तप्तनप्तनथनाश्च ॥
इदंतोमसि ॥ क्वोयक् ॥ इष्टीनमिति च ॥ स्नात्व्यादयश्च ॥ आज्जसेरसुक् ॥ अश्वक्षीरवृ
षलवणानामात्मप्रीतौक्यच् च ॥ आमि सर्वनाम्नः सुट् ॥ त्रेस्त्रयः ॥ कृसृभृवस्तियूर्ण
वञ्चेतुर्यश्च ॥ श्रीग्रामण्योश्छंदसि ॥ गोः पादांते ॥ इदितोनुम्धातोः ॥ रोमुचादीनां ॥
मस्जिनशोर्झलि ॥ ३ ॥ रधिजभोरचि ॥ नेद्धलिटि रधेः ॥ रभेरशोर्वलिटोः ॥ लभेश्च ॥
आङोयि ॥ उपात्प्रशंसायां ॥ उपसर्गात्खल्घञोः ॥ नसमुदभ्यांकेवलाभ्यां ॥ विभा ॥५२॥
षाचिण्णमुलोः ॥ उगिदचां सर्वनामस्थानेधातोः ॥ युजेरसमासे ॥ नपुंसकस्यझ

लचः ॥ इकोचिविधौ ॥ तृतीयादिषुभाषितपुंस्कं पुंवद्गालवस्य ॥ अस्थिदधिसक्थ्यक्ष्णा
मनङुदात्तः ॥ छंदस्यपिदृश्यते ॥ ईच्चिदिचने ॥ नाभ्यस्ताच्छतुः ॥ वानपुंसकस्य ॥ आछी
नद्योर्नुम् ॥ ४ ॥ शपूरणीदितां ॥ खावनडुहः ॥ दृक्स्वः स्तवःसाछंदसि ॥ दिवऔत् ॥
पथिमथ्यृभुक्षामात् ॥ इतोत्सर्वनामस्थाने ॥ थोंथे ॥ भस्यटेर्लोपः ॥ पुंसोसुङ् ॥ गो
तोणित् ॥ पादुत्तमोवा ॥ सख्युरसंबुद्धौ ॥ अनङ्सौ ॥ ऋदुशनस्पुरुदंसोनेहसांच ॥
रज्वत्क्रोडुः ॥ स्त्रियांच ॥ विभाषातृतीयादिषुचि ॥ चतुरनडुहोरामुदात्तः ॥ अम्संबु
द्धौ ॥ ऋतइद्धातोः ॥ ५ ॥ उपधायाश्च ॥ उदोष्ठ्यपूर्वस्य ॥ बहुलंछंदसि ॥ ६ ॥ युवोरनाकौ
॥ योलोपस्तृधिशप्श्यनोरुपधायास्त्रीणि ॥ इतिसप्तमाध्यायस्यप्रथमः पादः ॥

सिचि वृद्धिः परस्मैपदेषु॥ अतो लृ सांतस्य॥ वदव्रजहलंतस्याचः॥ ने टि॥ ह्यंतक्षणश्वसजागृणिश्व्येदिताम्॥ ऊर्णोतेर्विभाषा॥ अतो हलादेर्लघोः॥ नेड्वशि कृति॥ तितुत्रतथसिसुसरकसेषु च॥ एकाचउपदेशेनुदात्तात्॥ श्र्युकः किति॥ सनि ग्रहगुहोश्च॥ रुरुक्षति रुरुक्षते॥ श्वीदितो निष्ठायां॥ यस्य विभाषा॥ आदितश्च॥ विभाषाभावादिकर्मणोः॥ क्ष्वेड्यस्खांतध्वांतलग्नम्लिष्टविरिब्धफांटबाढानि मंथमनस्तमः सक्तविस्पष्टस्वरानायासभृशेषु॥ क्षिप्रवाक्ये॥ दृढस्थूलबलयोः॥ १॥ प्रभौ परिवृढः॥ कृच्छ्रगहनयोः कषः॥ घुषिरविशब्दने॥ अर्देः संनिविभ्यः॥ अभेश्चाविदूर्ये॥ पोरयज्ञे॥ वादांतशांतपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः॥ रूप्यमत्वरसंघुष्वास्वनां॥ हृषेर्लो ॥५३॥

मसु॥ अपचितश्च॥ कुहरेश्छंदसि॥ अपरिवृताश्च॥ सोमे ह्वरितः॥ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्तविशस्तृंस्तृग्रस्तृतक्तवतवत्वतूत्वतूस्त्रीरुज्वलितिक्षरितिभमितिवमियमितीतिच॥ आर्धधातुकस्येड्वलादेः॥ क्त्वक्त्वोरनात्मनेपदनिमित्ते॥ ग्रहोलिटिदीर्घः॥ वृतोवा॥ नलिङि॥ सिचि वपरस्मैपदेषु॥ २॥ इट्सनि वा॥ लिङ्सिचोरात्मनेपदेषु॥ ऋतश्च संयोगादेः॥ स्वरतिसूतिसूयतिधूदितोवा॥ रधादिभ्यश्च॥ निरः कुषः॥ इरयिप्रक्षायां॥ तीषसहलुभरुषरिषः॥ सनीवंतर्धभ्रस्जदंभुसिरञ्जियुर्णुभरज्ञपिसनां॥ क्रियः क्तानिष्ठयोः॥ पूङश्च॥ वसतेरुथोरट्॥ अंचेः पूजायां॥ लुभाविमोहने॥ ऋत्वभ्योञ्णिः॥ उदितोवा॥ सेसिचिकृतचतृफलभजत्रपश्च॥ गमेरट्परस्मैपदेषु॥ नश्चध्रुवस्रंसुभ्यः॥ तासिच्कृपः॥ ३॥ अचस्तास्वत्थल्यनिटोनित्यं॥ उपदेशेत्वतः॥

ऋतोभारद्वाजस्य॥ बभ्रूथाततंथजगृभ्मववर्थेतिनिगमे॥ विभाषासृजिदृशोः॥ इडयर्तिव्यतीनां॥ वस्वेकाजाद्घसां॥ विभाषागमहनविदविशां॥ सनिंससनिवांसं॥ ऋदृनोःस्ये॥ अंजेःसिचि॥ स्तुसुधूञ्भ्यःपरस्मैपदेषु॥ यमरमनमातांसक्च॥ स्मिपूङ्रञ्वशां सनि॥ किरश्चपंचभ्यः॥ कृदाशिषः सार्वधातुके॥ ईशःसि॥ ईडजनोर्ध्वे च॥ लिङः सलोपोनन्त्यस्य॥ अतोयेयः॥ ४॥ आतोङितः॥ आनेमुक्॥ ईदासः॥ अष्टनआविभक्तौ॥ रायोहलि॥ युष्मदस्मदोरनादेशे॥ द्वितीयायांच॥ प्रथमायाश्चद्विवचनेभाषायां॥ योचि॥ शेषेलोपः॥ मपर्यंतस्य॥ युवावौद्विवचने॥ यूयवयौजसि॥ त्वाहौसौ॥ तुभ्यमह्यौङयि॥ तवममौङसि॥ त्वमावेकवचने॥ प्रत्ययोत्तरपदयोश्च॥ त्रिचतुरोस्त्रियांतिसृचतसृ॥ अचिरऋतः॥ ५॥ ॥५४॥
जरायाजरसन्यतरस्यां॥ त्यदादीनामः॥ किमःकः॥ कुतिहोः॥ क्वाति॥ तदोःसःसावनंत्ययोः॥

अदसओसुलोपश्च॥ इदमीमः॥ दश्च॥ यःसौ॥ इदोयुंसि॥ अनाप्यकः॥ हलिलोपः॥ मजेर्व्यञ्जिः॥ अचोञ्णिति॥ अतउपधायाः॥ नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ॥ किति च॥ ६॥ सिचि प्रभावित्सन्यच॥ अतोजरायाअस्यदरां॥ इतिसप्तमाध्यायस्यद्वितीयः पादः॥ देविकाशिंशपोरिण्यवाद्वीर्घसत्रश्रेयसामातृ॥ कैकयमित्रयुप्रलयानांयादेरियः॥ नेन्द्राभ्यांपदांताभ्यांपूर्वेतुताभ्यामैच्॥ द्वारादीनांच॥ न्यग्रोधस्यचकेवलस्य॥ नकर्मव्यतिहारेस्वागतादीनांच॥ श्वादेरिञि॥ पदांतस्यान्यतरस्यां॥ उत्तरपदस्यच॥ अवयवाद्तोः॥ सुसर्वार्द्धाज्जनपदस्य॥ दिशोमद्राणां॥ प्राचांग्रामनगराणां॥ संख्यायाःसंवत्सरसंख्यस्यच॥ वर्षस्याभविष्यति॥ परिमाणांतस्यासंज्ञाशाणयोः॥ जेःप्रोष्ठपदानां॥ हृङ्गसिध्वंतेपूर्वपदस्यच॥ अनुशतिकादीनांच॥ १॥ देवताद्वंद्वेच॥ नेंद्रस्यपरस्य॥ दीर्घाच्च

रूपस्य॥ प्राचांनगरांते॥ जंगलधेनुबलजांतस्यविभाषितमुत्तरं॥ अर्धाधिकारिमाणस्यपूर्वस्यतु
वा॥ नातःपरस्य॥ प्रवाहणस्यढे॥ तस्यायस्यचं॥ नञः शुचीश्वरक्षेत्रज्ञकुशलनिपुणानां॥
यथातथयथापुरयोः पर्यायेण॥ हनस्तोचिण्णलोः॥ आतोयुक्चिण्कृतोः॥ नाद्यातोपदेशस्य
मांतस्यानाचमेः॥ जनिवध्योश्च॥ आर्तिह्रीह्लीरीक्नूयीक्ष्माय्यातांपुङ्णौ॥ शाछासाह्वाव्या
वेपायुक्॥ वोविधूननेजुक्॥ लीलोर्नुग्लुकावन्यतरस्यां॥ स्नेहविपातने॥ क्रियोहेतुभये
षुक्॥२॥ स्फायोवः॥ शदेरगतौतः॥ रुहःपोन्यतरस्यां॥ प्रत्ययस्थात्कात्पूर्वस्यातइदाप्य
सुपः॥ नयासयोः॥ उदीचामातस्थाने यकपूर्वायाः॥ भास्त्रैषाजाता हास्थानक्रपूर्वीणा
मपि॥ अभाषितपुंस्काच्च॥ आदाचार्याणां॥ ठस्येकः॥ इसुसुक्तांतात्कः॥ चजोःकुघिण्यतोः॥
ण्यंकादीनांच॥ होहंतेर्ञ्णिन्नेषु॥ अभ्यासाच्च॥ हेरचिङि॥ सन्लिटोर्जेः॥ विभाषाचे॥

नंक्वादेः॥ आजिघ्रद्ध्मोश्च॥३॥ भुजन्युब्जौपाण्युपतापयोः॥ प्रयाजानुयाजौयज्ञांगे॥ वं
चेर्गतौ॥ ओकउचः के॥ ण्यआवश्यके॥ यजयाचरुचप्रवचर्चश्च॥ वचोशब्दसंज्ञा
यां॥ प्रयोज्यनियोज्यौशक्यार्थे॥ भीत्र्यंभीस्ये॥ घोर्लोपोलेटिवा॥ ओतःश्यनि॥ क्स
स्याचि॥ लुग्वादुदृदृहलिहगुहाभ्यामन्यतरस्यां॥ रामायणीनंदीघः श्यनि॥ छिवु
क्लमुचमांशिति॥ क्रमःपरस्मैपदेषु॥ इषुगमियमांछः॥ पाघ्राध्मास्थाम्नादाण्
दृश्यर्तिसर्तिशदसदांपिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः॥ ज्ञाज
नोर्जा॥ घाट्यनांकृत्वः॥४॥ मीनातेर्निगमे॥ मिदेर्गुणः॥ जुसिच॥ सार्वधातुकार्ध
धातुकयोः॥ आयादेशेचिण्णलोः॥ पुगंतलघूपधस्यच॥ नाभ्यस्तस्याचिपिति
सार्वधातुके॥ भूसुवोस्तिङि॥ उतोवृद्धिर्लुकिहलि॥ ऊर्णोतेर्विभाषा॥ गुणोपूर्वे॥

त्पाहरम्॥ब्रुवईट्॥यङोवा॥तुरुस्तुशम्यमः सार्वधातुके॥अस्तिसिचोपृक्ते॥बहुलंछं
॥५६॥ दसि॥रुदश्वपंचभ्यः॥अडागार्ग्यगालवयोः॥अदः सर्वेषां॥५॥अतोदीर्घोयञि॥सुपि
च॥बहुवचनेझल्येत्॥ओसिच॥आङिचापः॥सबुद्धौच॥अंबार्थनद्योर्ह्रस्वः॥ह्रस्वस्य
गुणः॥ङसिच॥ऋतोङिसर्वनामस्थानयोः॥घेर्ङिति॥आण्नद्याः॥याडापः॥स
र्वनाम्नःस्याड्ढ्रस्वश्च॥विभाषाद्वितीयातृतीयाभ्यां॥ङेराम्नद्यामीभ्यः॥इदुद्भ्यां॥
ओत्॥अच्चेः॥आङोनास्त्रियां॥६॥देविकादेवतास्कायोभुजमीनातेरतोविंश
तिः॥इतिसप्तमाध्यायस्यतृतीयः पादः॥चौवडुपधायाह्रस्वः॥नाग्लोपिशास्वृदितां॥
श्नाजभासभाषदीपजीवमीलपीडामान्यतरस्यां॥लोपःपिबतेरीच्चाभ्यासस्य॥तिष्ठ ॥५६॥
तेरित्॥ज्घ्रतेर्वा॥उःऋत्॥नित्यंछंदसि॥दयतेर्दिगिलिटि॥ऋतश्चसंयोगादेर्गुणः॥

ऋच्छत्यृतां॥शृदृप्रांह्वस्वोवा॥केपः॥नकपि॥आपोन्यतरस्यां॥ऋदृशोङिगुणः॥अस्य
तेस्थुक्॥श्वयतेरः॥पतःपुम्॥वचउम्॥१॥रीङःसर्वधातुकेगुणः॥अयङियिङि॥
उपसर्गादृच्छत्यृतेः॥एतेर्लिङि॥अक्तेसार्वधातुकयोर्दीर्घः॥चौच॥रीङृतः॥रिङ्शय
ग्लिङ्क्षु॥गुणोर्तिसंयोगाद्योः॥यङिच॥ईघ्राध्मोः॥अस्यचौ॥क्यचिच॥अत्राना योदन्य
धनायाबुभुक्षापिपासागर्धेषु॥नेन्द्रस्यपुत्रस्य॥दुरस्युरेविषस्यतिरिषस्यति॥
अभ्याधस्यात्॥देवसुम्नयोर्यजुषिकाठके॥कव्यध्वरपृतनस्यर्चिलोपः॥घातिस्यतिमा
स्थाम्नाम्नाकिति॥२॥शाछोरन्यतरस्यां॥दधातेर्हिः॥जहातेश्चहिः॥विभाषाछंदसि॥सु
धितवसुधितनेमधितधिष्वधिषीयच॥दादेर्धातोः॥अचउपसर्गात्तः॥अपोभि॥सख्या
र्धधातुके॥तासस्त्योर्लोपः॥रिच॥हलन्ति॥यीवर्णयोर्दीर्घाजेझ्योः॥सनि मीमाघुर

भलभशकपतपदामचहस॥आपृतप्यथामीत्॥दंभइच्च॥सुचोकर्मकस्यगुणोवा॥
अत्रलोपीभ्यासस्य॥ऊ स्थ॥हलादिःशेषः॥३॥रार्पूर्वीः खयः॥कुहोश्चुः॥नकवतेयीङ्॥
रुषश्छरसि॥दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेति कैलर्ष्यापनीफणसंसनिष्यदस्कृदि
ऋकनिकदद्भरिभ्रद्विध्वतोदविद्युतन्नरित्रतः सरीसृपतंवरीवृजन्मर्ज्यागनीगं
तीतिच॥उरत्॥घृतिस्वाप्योः संप्रसारणं॥व्यथोलिटि॥दीर्घइणः किति॥अत आदेः॥
तस्मान्नुड्द्विहलः॥अश्नोतेश्च॥भवतेरः॥ससूवेतिनिगमे॥निजांत्रयाणां गुणश्लौ॥
भ्वादिभ्यः॥अर्तिपिपर्त्योश्च॥बहुलंछंदसि॥सन्यतः॥ओः पुयण्ज्यपरे॥४॥स्रवति
श्रोणति द्रवतिप्रवतिस्नवति च्यवतीनांवा॥गुणोयङ्लुकोः॥दीर्घोकितः॥नीग्वंचुस्रं ॥५७॥
सुध्वंसुभ्रंसुकसपतपदस्कंदां॥नुगतोनुनासिकांतस्य॥जपजभदहदशभंज

पशांच॥चरफलोश्च॥उत्परस्यातः॥तिच॥रीरदुपधस्यच॥रुग्रिकौचलुकि॥ऋ
त श्च॥सन्वल्लघुनिचङ्परेनग्लोपे॥दीर्घोलघोः॥अत्स्मृदृत्वरप्रथम्रदस्तृस्प
शां॥विभाषावेष्टिचेष्ट्योः॥ईचगापः॥५॥णौचङ्युपधाच्छ्रिस्फुरग्रहांः स्रार्पूर्वीः स्रवतिसस्तर
त्॥चतुर्थःपादः॥इतिसप्तमाध्यायः समाप्तः॥ॐम्॥सर्वस्यहे॥तस्यपरमामे
डितं॥अनुदात्तंच॥निसमुपविषयोः॥प्रेरर्वर्जने॥प्रसमुपोदः पादपूरणे॥उपर्यध्यधसःसामी
प्ये॥वाक्यादेरामंत्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु॥एकंबहुव्रीहिवत्॥आबा
धेच॥कर्मधारयवदुत्तरेषु॥प्रकारेगुणवचनस्य॥अकृच्छ्रेप्रियसुखयोरन्यतरस्यां॥य
थास्वेयथायथं॥हंहंरहस्यमर्यादावचनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु॥पू
रणे॥पदात्॥अनुदात्तंसर्वमपादादौ॥आमंत्रितस्यच॥युष्मदस्मदोःषष्ठीचतुर्थीद्वि

तीयास्थयोर्वान्नावे॥१॥बहुवचनस्यवस्नसेा॥तेमयाबेकवचनस्य॥तामौहितीयाया॥
नचवाहाहैवयुक्ते॥पदस्यात्थैश्चानालोचने॥सपूर्वायाःप्रथमायाविभाषा॥तिङोगोत्रा
दीनिकुत्सनाभीष्ण्ययोः॥तिङ्तिङः॥नलुट्॥निपातैर्यद्यद्धिहंतकुविन्नेचेच्चणकाश्चद्य
त्रयुक्तं॥नहप्रत्यारंभे॥सत्यंप्रश्ने॥अंगात्प्रातिलोम्ये॥हिच॥एहिमन्येनकमपिसा
कांक्षं॥यावद्यथाभ्यां॥पूजायांनानंतरं॥उपसर्गव्यपेतंच॥तुपश्यपश्यताहैःपूजायां॥
अहोच॥२॥शेषविभाषा॥पुराचपरीप्सायां॥नन्वित्यनुज्ञैषणायां॥किंक्रियाप्रश्नेनु
पसर्गमप्रतिषिद्धं॥लोपविभाषा॥एहिमन्येप्रहासेलट्॥जात्वपूर्वं॥किंवृत्तंचिदुत्त
रं॥आहोउताहोचानंतरं॥शेषेविभाषा॥गत्यर्थलोटाल्पुनश्चेत्कारकंसर्वान्यत्॥
लोट्च॥विभाषितंसोपसर्गमनुत्तमं॥हंतचे॥आमंत्रितमनंतिके॥यद्वि ॥५८॥
मा

लुपरंछंदसि॥चनचिदिवगोत्रादितांत्रेडितेघगतेः॥चादिषुच॥चवायोगेप्रथमा॥
हैतिक्षियायां॥३॥अहैतिविनियोगेच॥चाहलोपएवेत्यवधारणं॥चादिलोपविभाषा॥
वैवावेतिच्छंदसि॥एकान्याभ्यांसमर्थाभ्यां॥यद्वृत्तान्नित्यं॥पूजनात्पूजितमनुदात्तंका
दिभ्यः॥सगतिरपितिङ्॥कुत्सनेचसुप्यगोत्रादौ॥गतिर्गतौ॥तिङिचोदात्तवति॥आ
मंत्रितंपूर्वमविद्यमानवत्॥नामंत्रितेसमानाधिकरणेसामान्यवचनं॥विभाषितंवि
शेषवचनेबहुवचनं॥४॥सर्वस्यबहुवचनस्यशेषेहतिचतुरः॥इत्यष्टमाध्यायस्यप्र
थमःपादः॥पूर्वत्रासिद्धं॥नलोपःसुप्स्वरसंज्ञातुग्विधिषुकृति॥नमुने॥उदात्तः स्वरित
योर्यणः स्वरितोनुदात्तस्य॥एकादेशउदात्तेनोदात्तः॥स्वरितोवानुदात्तेपदादौ॥नलो
पःप्रातिपदिकांतस्य॥नडिःसंबुद्ध्योः॥मादुपधायाश्चमतोर्वोयवादिभ्यः॥इयः॥

संज्ञायां॥आसंदीवच्छीवच्चर्मीवत्कर्मीवद्दुमण्वच्चर्मण्वती॥उदन्वानुदधौच॥राजन्वान्सौ
राज्ये॥छन्दसीरः॥अनोनुट्॥नाहृस्य॥रुपारोलुः॥उपसर्गस्यायतौ॥ग्रोर्यङि
॥१॥अचिविभाषा॥परश्चघांकयोः॥संयोगांतस्यलोपः॥रात्सस्य॥धिच॥झलोझलि॥
क्सोदंगात्॥दृढदृढि॥स्कोःसंयोगाद्योरंतेच॥चोकुः॥हादेः॥दादेर्धातोर्घः॥वादुहमु
हष्णुहस्निहां॥नहोधः॥आहस्थः॥ब्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशांषः॥ष्
ढोःकःसि॥दादेर्धातोर्घः॥षढोःकःसि॥रदाभ्यांनिष्ठातोनः पूर्वस्यचदः॥संयोगादेरातोधातोर्यण्वतः॥ल्वा
दिभ्यः॥ओदितश्च॥क्षियोदीर्घात्॥रयोस्पर्शे॥अंचोनपादाने॥दिवोविजिगीषा

यां॥निर्वाणोवाते॥शुषःकः॥पचोवः॥शायोमः॥प्रस्योन्मतरस्यां॥अनुपसर्गात्फु
ल्लक्षीवकृशोल्लाघाः॥वुदरिद्रांद्राघ्वाढ्यीभ्योन्यतरस्यां॥नध्याख्यापृमूर्छिमदां॥
क्तिनोभोगप्रशययोः॥भिन्नंशकलं॥ऋणमाधमर्ण्ये॥३॥संज्ञेतनिषत्तानुत्तप्रतूर्त
सूर्तगूर्तानिछंदसि॥क्तिनप्रत्ययस्यकुः॥नशे वा॥मोनोधातोः॥म्वोश्च॥ससजु
षोरुः॥अवयाःश्वेतवाःपुरोडाश्च॥अहन्॥रोसुपि॥अम्नरूधरवरित्रभयथा
छंदसि॥भुवश्चमहाव्याहृतेः॥वसुस्रंसुध्वंस्वनडुहोदः॥तिप्पतृस्तेः॥सिपिधा
तोरर्वा॥दश्च॥वोरुपधायादीर्घइकः॥हलिच॥उपधायांच॥नभकुर्पुरां॥अदसो
सेर्दादुदोमः॥४॥एतईदूदुवचने॥वाम्यस्यटेःसुतउदात्तः॥प्रत्यभिवादेभूदे॥

दूराद्धूते च॥ हेहैप्रयोगे हेहयोः॥ गुरोरनृतोऽनंत्यस्याप्येकैकस्य प्राचां॥ ओमभ्यादाने॥ ये यज्ञकर्मणि॥ प्रणवष्टेः॥ याज्यांतः॥ ब्रूहिप्रेष्यश्रौषडाहावाहामामंत्रणे॥ अग्नीत्प्रेषणे परस्यच॥ विभाषाऽऽनुपसर्गस्य प्रतिवचने हेः॥ निरनुयोगे च॥ आम्रेडितं भर्त्सने॥ अंगयुक्तं तिङाकांक्षं॥ विचार्यमाणानां॥ पूर्वं तु भाष्यवत्॥ प्रतिश्रवणे च॥ अनुदात्तं प्रश्नान्ताभिपूजितयोः॥ ६॥ चिदिति चोपमार्थे प्रयुज्यमाने॥ उपरिस्विदासीदिति च॥ स्वरितमामंत्रितेसूयासंमतिकोपकुत्सनेषु॥ शेषात्कर्तरि परेषु तिङाकांक्षं॥ अनन्त्यस्यापि प्रश्नाख्यानयोः॥ पुनर्वै चेदुतौ॥ एचोप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्यादुत्तरस्येदुतौ॥ तयोर्य्वावचि संहितायां॥ ६॥ पूर्वत्रासिद्धे नसन्धेतरेचिदिति यणो॥ ॥

स्याष्टमाध्यायस्यद्वितीयः पादः॥ मतुवसोरनुदात्तं संबुद्धौछंदसि॥ अत्रानुनासिकः पूर्वस्य तुवा॥ आतोटिनित्यं॥ अनुनासिकात्परोनुस्वारः॥ समः सुटि॥ पुमः खय्यम्परे॥ नश्छव्यप्रशान्॥ उभयथर्क्षु॥ दीर्घादटिसमानपादे॥ रुत्वे॥ खतवान्पायौ॥ कानाम्रेडिते॥ ढो ढेलोपः॥ रोरि॥ खरवसानयोर्विसर्जनीयः॥ रोः सुपि॥ भोभगोअघोअपूर्वस्ययोशि॥ व्योर्लघुप्रयत्नतरः शाकटायनस्य॥ लोपः शाकल्यस्य॥ ओतोगार्ग्यस्य॥ १॥ उञि च पदे॥ हलि सर्वेषां॥ मोनुस्वारः॥ नश्चापदांतस्यझलि॥ मोराजि समः क्वौ॥ हेमपरेवा॥ नपरेनः॥ ङ्णोः कुक्टुक्शरि॥ ङःसिचुट्॥ नश्च॥ शितुक्॥ ङमोह्रस्वादचिङमुण्नित्यं॥ मयउञोवो वा॥ विसर्जनीयस्यसः॥ शर्परे विसर्जनीयः॥ वाशरि॥ कुप्वोः कःपौ च॥ सोपदादौ॥ इणः षः॥ नमस्पुरसोर्गत्योः॥ २॥ इदुदुपधस्याप्रत्ययस्य॥ तिरसोन्यतरस्यां॥ दिव्यभ्र

तुरितिरत्नौर्थे॥इसुसोःसामर्थ्ये॥नित्यंसमासेनुनरपदस्यस्य॥अतःकृकमिकंसकुंभपात्र
॥६१॥ कुशाकर्णीष्वनव्ययस्य॥अधःशिरसीपदे॥कस्कादिषुच॥छंदसिवाप्रेडितयोः॥कंकरत्क
रतिकृधिकृतेष्वनदितेः॥पंचम्याःपराव्यर्थे॥पातौचबहुलं॥षष्ठ्याःपतिपुत्रपृष्ठपा
रपदपय
स्पोषेषु॥इडायाबा॥अपदांतस्यमूर्धन्यः॥सहेःसाडःसः॥रणकोः॥नुम्विसर्जनीयशर्व्यवा
येपि॥आदेशप्रत्यययोः॥शासिवसिघसीनांच॥३॥स्तोतिण्योरेवषण्यभ्यासात्॥सःस्व
दिष्वदिसहीनांच॥प्राक्सितादड्व्यवायेपि॥स्थादिष्वभ्यासेनचाभ्यासस्य॥उपसर्गा
त्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधतिचसंज्ञायां॥सदिरप्रतेः॥स्तन
भेः॥अवाच्चालंबनाविदूर्ययोः॥वेश्चस्वनोभोजने॥परिनिविभ्यःसेवसितसयसिवुसह
सुटस्तुस्वंजां॥सिवादीनांवाड्व्यवायेपि॥अनुविपर्यभिनिभ्यःस्यंदतेरप्राणिषु॥वेःस्कंदे ॥६१॥

रनिष्ठायां॥परेश्च॥परिस्कंदःप्राच्यभरतेषु॥स्फुरतिस्फुलत्योर्निर्निविभ्यः॥वेश्छंदसि
नित्यं॥इणःषीध्वंलुङ्लिटांधोंगात्॥विभाषेटः॥समासेगुतेःसंगः॥४॥भीरोस्थानं॥
अग्नेःस्तुत्स्तोमसोमाः॥ज्योतिरायुषस्तोमः॥मातृपितृभ्यांस्वसा॥मातुःपितुर्भ्यामि
न्यूनरस्यां॥अभिनिरस्तनःशब्दसंज्ञायां॥उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधतिषु॥सुविनि
दुर्भ्यःसुपिसूतिसमाः॥निनदीभ्यांस्नातेःकौशले॥सूत्रेप्रतिष्ठातं॥कपिष्ठलोगोत्रे॥प्र
च्छोग्रगामिनि॥दक्षासनयोर्विहरः॥छंदोनामिच॥गवियुधिभ्यांस्थिरः॥विकुश
मिपरिभ्यस्थलं॥अंबाबगोभूमिसव्यापद्दिक्कुरुकुरुंकुंभमंजिपुंजिपरमेवृद्धि
र्दिव्यग्निभ्यस्थः॥सुषामादिषुच॥एतिसंज्ञायामगात्॥नक्षत्राद्वा॥५॥ष्टुत्वास्तो
दौतद्धिते॥निरस्तपतावनासेवने॥युष्मत्तत्ततक्ष्वक्ष्मनःपादः॥यजुर्व्येकेषां॥

स्कृतस्तोमयोश्छंदसि॥ पूर्वपदात्॥ सुञः॥ सनोतेरनः॥ सहेः पृतनर्ताभ्यां च॥ नरपर
सपिसर्जिस्पृधिस्पृहिसवनादीनां॥ सात्पदाद्योः॥ सिचोयङि॥ सेधतेर्गतौ॥ प्रति
स्तब्धनिस्तब्धौ च॥ सोढः॥ स्तंभुसिवुसहां चङि॥ सुनोतेस्यसनोः॥ सदिरुभ्यां
परस्यलिटि॥ निव्यभिभ्योऽव्यवाये वा छंदसि॥ ध॥ मतुवसो रुजिचेदुदुपधस्य॥ति
ष्योर्भीरो ह्रुस्वान्तादेकोनाविंशतिः॥ इत्यष्टमाध्यायस्यतृतीयः पादः॥ रषाभ्यां नोणः
समानपदे॥ अट्कुप्वाङ्नुम्व्यवायेपि॥ पूर्वपदात्संज्ञायामगः॥ वनंपुरगामिश्रका
सिध्रकासारिकाकोटराग्रेभ्यः॥ प्रनिरंतः शरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षा ॥६२॥
ष्योसंज्ञायामपि॥ विभाषौषधिवनस्पतिभ्यः॥ अङ्कोरंतात्॥ वाहनमाहितात्॥ पा

नंदेशे॥ वाभावकर्मणोः॥ प्रतिपदिकांतनुम्विभक्तिषुच॥ एकाजुत्तरपदेणः॥ कुमतिच॥
उपसर्गादसमासेपिणोपदेशस्य॥ हिनुमीना॥ आनिलोट्॥ नेर्गदनदपतपदंघुमा
स्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषुच॥ शेषेविभाषा
कर्वादावषांतउपदेशे॥ अनितेः॥ अंतः॥ ३॥ उभोसाभ्यासस्य॥ हंतेरत्पूर्वस्य॥ वमोर्वा॥
अंतरदेशे॥ अयनंच॥ छंदस्यदवग्रहात्॥ नश्चधातुस्थोरुषुभ्यः॥ उपसर्गाद्बहुलं॥
कृत्यचः॥ णोविभाषा॥ हलश्चेजुपधात्॥ इजादेः सनुमः॥ वानिंसनिक्षनिंदां॥ नभाभू
पूकमिगमिप्यायीवेपां॥ वाऽसंदांतात्॥ ३नशोः शांतस्या॥ पदांतस्य॥ पदव्यवायेपि॥
क्षिम्नादिषुच॥ स्तोः श्चुनाश्चुः॥ २॥ ष्टुनाष्टुः॥ नपदांताद्दीर्घात्॥ तोः षि॥ रात्॥

परोनुनासिकेनुनासिको वा॥अचोरहाभ्यां द्वे॥अनचि च॥नादिन्याक्रोशेपुत्रस्य॥शरोचि॥
॥६३॥ त्रिप्रभृतिषुशाकटायनस्य॥सर्वत्रशाकल्यस्य॥दीर्घादाचार्याणां॥झलांजश्झशि॥अ
भ्यासेचर्च॥खरिच॥वावसाने॥अणोप्रगृह्यस्यानुनासिकः॥अनुस्वारस्यययि
परसवर्णः॥वापदान्तस्य॥तोलि॥३॥उदःस्थास्तंभोः पूर्वस्य॥झयोहोन्यतरस्यां॥
शश्छोटि॥हलोयमांयमिलोपः॥झरोझरिसवर्णे॥उदात्तादनुदात्तस्यस्वरितः॥
नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानां॥अअसि॥४॥रषाभ्यामुभौष्ठ
नोदः स्थाष्टौ॥इत्यष्टमाध्यायस्यचतुर्थःपादः॥सूत्राण्यष्टौकवेदाग्नयउलपरतो ॥६३॥
ह्यंगपक्षास्तृतीयेभूरामांगानितुर्येरवदहनऋतवः पंचमेब्धीषुबाणाः॥षष्ठेच

न्यइयः षड्गुणज्वलनिधयः सप्तमेशैलतर्काब्धयः स्युस्त्वष्टमेथोव्यरचयत
मुनिः पाणिनिर्व्याकृतौ तः॥१॥अथसूत्रसंख्याप्रमाणं॥प्रथम ३४९॥द्वितीय
॥२६७॥तृतीय॥ ६३१॥चतुर्थ ६३०॥पंचम॥५५४॥षष्ठ॥७३२॥सप्तम ४३६॥
अष्टम ३६७॥एवंसंख्या॥ ३९६६॥श्रीशंकरार्पणमस्तु॥तेलादक्षेज्वलादक्षे
दक्षेशिथिलबंधनात्॥मूर्खहस्तेनदातव्यमेवंवदतिपुस्तकं॥अलंनदोषान्मति
विभ्रमाद्वायल्किंचिदूनंलिखितंमयेह॥तत्सर्वमार्यैःपरिशोधनीयंकोपंनकुर्या
त्खलुलेखकस्य॥१॥श्रीकृष्णार्पणमस्तु॥अष्टाध्यायः समाप्तः॥॥७॥७॥७॥

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ इत्यष्टाध्यायीसूत्रपाठसमाप्तः॥